# माध्यमिक शिक्षा बोर्ड राजस्थान, अजमेर
## उच्च माध्यमिक परीक्षा–2022
## मॉडल प्रश्नपत्र
**विषय – संस्कृत**
**कक्षा – 10**

**समय– 2 घण्टे 45 मिनट** **पूर्णांक –80**

## खण्ड – अ

प्रश्न :– 1. अधो लिखित प्रश्नानां उचित विकल्पं चिनुत :– 1

(i) बहुर्बलवती सदा ' इति पाठ; कस्माद् ग्रन्थात् संकलितः ? 1

(अ) काकल्याः (ब) कथासंग्रहात्

(स) शुकसप्तते; (द) लसल्लतिकायाः

(ii) ' विचित्रः साक्षी ' पाठः केन विरचितम् ? 1

(अ) ओमप्रकाश ठाकुरेण (ब) हरिदत्तशर्मणा

(स) सुश्रुतेन (द) कातिदासेन

(iii) कृशकायः कः आसीत् ? 1

(अ) न्यायाधीशः (ब) आरक्षी

(स) रक्षापुरूषः (द) अभियुक्तः

(iv) कः वातावरणं कर्कशध्वनिना आकुलीकरोति ? 1

(अ) काकः (ब) पिकः

(स) मयूरः (द) बकः

(v) वृषभः कुत्र पपात् ? 1

(अ) आकाशे (ब) जले

(स) भूमौ (द) न कुत्रापि

(vi) कुशलवौ कम् उपसृत्य प्रणमतः ? 1

(अ) रामम् (ब) विदूषकम्

(स) वाल्मिकीं (द) लक्ष्मणम्

(vii) परमम् आरोग्यं कस्मात् उपजायते ? 1

(अ) आलस्यात् (ब) व्यायामात्

(स) बलात् (द) भोजनात्

(viii) उदयसमये अस्तसमये कः रक्तः भवति ? 1

(अ) चन्द्रः (ब) तारकः

(स) सूर्यः (द) ध्रुवतारकः

(ix) गुणी किं वेत्ति ? 1

(अ) धनं (ब) गुणं

(स) ज्ञानं (द) आचारं

(x) ' शुचिपर्यावरण ' पाठानुसारेण केषां माला रमणीया ? 1

(अ) ललितलतानाम् (ब) पुष्पाणाम्

(स) मौक्तिकानाम् (द) रूप्यकाणाम्

(xi) ' अनृतम् ' शब्दस्यार्थमस्ति ?

(अ) सत्यम् (ब) असत्यम्

(स) परस्परम् (द) सामीप्यम्

(xii) माता सुरभिः किमर्थम् अश्रूणि मुञ्चति स्म ? 1

(अ) पुत्रस्य दैन्यं दृष्ट्वा (ब) कृषीवलस्य अत्याचारं दृष्ट्वा

(स) जगतः पीडां दृष्ट्वा (द) स्वविवशतां दृष्ट्वा

प्रश्न :– 2. समुचित विभक्ति प्रयोगेण रिक्तस्थानानि पूरयत :–

(i) सः ................................................... सह ग्रामं गच्छति। (पितृशब्द) 1

(ii) मोहनः ........................................................ काणः। (नेत्र शब्द) 1

(ख) कोष्ठके शब्दस्य समुचित रूप प्रयोगेण रिक्तस्थानानि पूरयत :–

(iii) .................................... मोदकं रोचते। (अस्मद्) 1

(iv) ............................................ कालिदासः श्रेष्ठः । (कवि) 1

(ग) कोष्ठके प्रदत्त प्रकृति प्रत्ययाभ्यां पदं निर्माय वाक्य पूरयत :–

(v) ग्रामं................................. ईश्वरं स्मरति (ग्रम+शतृ) 1

(vi) बालानां................................. कः न जानाति। (चपल+त्वम्) 1

प्रश्न :– 3. अधोलिखितं अपठितगद्याशं पठित्वा एतदाधारित प्रश्नानां यथानिर्देशं उत्तराणि लिखत :– 1x10=10

अद्य औद्योगिक विकासात् नगराणां विकासात् च जायते पर्यावरणं प्रदूषितम्। अतः अद्य नागारिकाणां कर्त्तव्यमस्ति यद् वयं पर्यावरण सरक्षणार्थ प्रयत्नं कुर्मः तत्कृते वयं स्वच्छतां च धारयामः। महात्मागांधि महोदयस्यापि स्वच्छतोपरि विशेषः आग्रहे आसीत्। साम्प्रतमपि सर्वकारेण ' स्वच्छभारताभियानम् ' प्रचालितम्। तस्योद्देश्यमपि पर्यावरणस्य संरक्षेण अस्ति। एवमेव नदीतडागवापीनां जलस्य स्वच्छतायाः प्रेरणा वयं ' नमामि गंगे ' इति अभियानेन ग्रहीतुं शक्नुमः।

(i) अस्य गद्यांशस्य उपयुक्तं शीर्षक लिखतु।

(ii) पर्यावरण प्रदूषणं कस्माद् जायते।

(iii) सर्वकारेण किम् अभियानम् प्रचालितम् ?

(iv) स्वच्छतायाः प्रेरणा केन ग्रहीतुं शक्यते ?

(v) 'वयं पर्यावरण संरक्षणार्थं प्रयत्नं कुर्मः अत्र कुर्मः इति क्रियापदस्य कर्त्तपदम् लिखतु।

(vi) ' स्वच्छ भारतम् ' इत्यनयोः पदयोः विशेषणपदम् लिखतु।

(vii) ' तस्योद्देश्यमपि ' अत्र तस्य इति सर्वनामपदं कस्य स्थाने प्रयुक्तम् ?

(अ) नमामि गंगे (ब) स्वच्छभारताभियानम्

(स) शौचालय निर्माणम् (द) अवकरनिस्तारणम्

(viii) ' अधुना ' इति पदस्य पर्यायवाचिपदं गद्यांशे किम् अस्ति ?

(ix) वापी इतिपदस्य हिन्दी अर्थः क ?

(x) 'धारयामः ' इतिपदे लकार–पुरूष–वचनं लिखत।

(xi-xii) अधोलिखत प्रश्नानांउत्तराणि संस्कृतमाध्यमेन लिखत। 1

1. कविः कुत्र संचरणं कर्त्तुम् इच्छति ?

अथवा

कियता बलेन व्यायामः कर्त्तव्यः ।

2. ' सौहार्द प्रकृतेः शोभा ' अस्मिन् नाटके कति पात्राणि सन्ति ? 1

अथवा

निर्धनः जनः कथं वित्तम् उपार्जितवान् ?

## खण्ड – ब

**लघूत्तरात्मक प्रश्नाः**

प्रश्न – 4. अधोलिखितपदयोः संधिचिच्छेदं कृत्वा सन्धेः नामापि लिखत– 1+1=2

प्रकृतिरेव, षडाननः

प्रश्न – 5. अधोलिखितपदयोः सन्धिं कृत्वा सन्धेः नामापि लिखत– 1+1=2

रामः + च , सद् + कारः

प्रश्न – 6. अधोलिखितरेखाङ्कित पदयोः समस्तपदानां विग्रहं कृत्वा समासस्य नामापि लिखत–1+1=2

(क) रमेशः प्रतिवारं प्रयासं करोति।

(ख) कृष्णकाकःकोटरे वसति स्म।

प्रश्न –7. अधोलिखितरेखाङ्कित पदयोः विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखत–1+1=2

(क) राजेशः शिवं च केशवं च नमति।

(ख) सरोवरे नीलानि कमलानि शोभन्ते।

प्रश्न –8. अधोलिखितपदयोः उपसर्गं शब्दं च पृथक् कृत्वा लिखत– 1+1=2

(क) अवगुणः

(ख) दुर्भाग्यम्

प्रश्न – 9. मंजूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखत– 1+1=2

(क) ..........................समयस्य सदुपयोगः करणीयः। (अपि,सदा,यथा)

(ख) भूकम्पित–समये ...............................गमनमेव उचितं भवति। (अधः उपरि,बहिः)

प्रश्न – 10. अधोलिखितौ संख्यावाचिशब्दौ संस्कृते लिखत– 1+1=2

140, 2021

प्रश्न – 11. अधोलिखितवाक्योः रेखाङ्कितपदमाधृत्य प्रश्न निर्माणं कुरूत– 1+1=2

(क) चौरस्यपादध्वनिना अतिथिः प्रबुद्धः।

(ख) उद्याने पक्षिणांकलरवं चेतः प्रसादयति।

प्रश्न –12. अधोलिखितश्लोकस्य अन्वयं कुरूत। 1+1=2

विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्

अश्वश्चेद् धावने वीरः भारस्य वहने खरः।

प्रश्न – 13. अधोलिखितवाक्ययोः शुद्धं कृत्वा लिखत– 1+1=2

(क) अलंविवादम् ।

(ख) ग्रामस्य परितः जलम् अस्ति।

प्रश्न – 14. स्वपाठ्यपुस्तकात् श्लोकद्वयं संस्कृतभाषायाम् लिखत– 1+1=2

प्रश्न – 15. ' विचित्र साक्षी ' इति कथायाः सारं हिन्दी भाषायां लिखत। 1+1=2

प्रश्न – 16. पाठ्यपुस्तकात पद्यांशस्य संस्कृते भावार्थ लेखनम्–(द्वयोएकस्य) 1+1=2

शरीरायासजननं कर्म व्यायामसंज्ञितम्।

तत्कृत्वा तु सुखं देहं विमृद्नीयात् समन्ततः।।

अथवा

न चैनं सहसाक्रम्य जरा समधिरोहति।

स्थिरीभवति मांसं च व्यायामाभिरतस्य च ।।

**खण्ड – स**

प्रश्न – 17. अधोलिखितस्यगद्यांशस्य सप्रसंगं हिन्दी भाषायाम् अनुवादं करोतु– 3

अस्ति देउलाख्यो ग्रामः। तत्र राजसिंहः नाम राजपुत्रः वसति स्म। एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। मार्गे गहनकानने सा एक व्याघ्रं ददर्श। सा व्याघ्रमागच्छन्त दृष्ट्वा धाष्ट्र्यात पुत्रौ चपेटया प्रहत्य जगाद–'' कथमे– कैकशो व्याघ्रभक्षणाय कलहं कुरूथः ? अयमेकस्तावद्विभज्य भुज्यताम् पश्चाद् अन्यो द्वितीयः कश्चिल्लक्ष्यते।''

अथवा

बहुन्यापत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव '' इति। सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि ह्रदयमद्रवत्। स च तामेवमतान्त्वयत्

''गच्छ वत्से! सर्वं भद्रं जायते।''

प्रश्न – 18. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दी भाषायाम् अनुवादं लिखत– 3

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।<br>
यदि दैवात् फलं नास्ति छाया केन निवार्यते ।।

अथवा

कज्जलमलिनं धूमं मुंचति शतशकटीयानम्।<br>
वाष्प्यानमाला संधावति वितरन्ती ध्वानम्।।<br>
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम् । शुचि..... ।।

प्रश्न – 19. अधोलिखितस्य नाट्यांशस्य सप्रसंगं हिन्दी भाषायाम् अनुवादं लिखत– 3

लवः – ननु भगवान् वाल्मीकिः।

रामः – केन सम्बन्धेन ?

लवः – उपनयनोपदेशेन।

रामः – अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः – न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः – अहो माहात्म्यम्।

कुशः – जानाम्यहं तस्य नामधेयम्।

रामः – कथ्यताम्।

अथवा

सिंह – ( कोधेन गर्जन्) भोः! अहं वनराजः किं भयं न जायते ? किमर्थं मामेव तुदन्ति सर्वे मिलित्वा ?

एकः वानरः – यतः त्वं वनराजः भवितुं तु सर्वथाऽयोग्यः। राजा तु रक्षकः भवति परं भवान् तु भक्षकः। अपि च स्वरक्षायामपि समर्थः नासि। तर्हि कथमस्मान् रक्षिष्यसि ?

प्रश्न – 20. क्रमरहितानां षडवाक्यानां क्रमपूर्वकं संयोजनं कुरूत। 3

1. एकः बुभुक्षितः श्रृगालः भोजनार्थं वने इतस्ततः भ्रमति स्म।
2. लतायाः बहूनि पक्वानि द्राक्षाफलानि आसन्।
3. परं तथापि द्राक्षाफलानि न प्राप्नोत्।
4. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।
5. एतानि द्राक्षाफलानि अम्लानि इति उक्त्वा कुपितः श्रृगालः ततः गतः
6. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

अथवा

अधोलिखित पंचशब्देषु केचन त्रयाणां शब्दानां संस्कृते वाक्यः निर्माण कुरूत–

सूर्यः, पिकः, मुर्खः, वायसः, निमित्तम्

**खण्ड – द**

प्रश्न –21. भवान् राजकीय–आदर्श–उच्च–माध्यमिक–विद्यालय–कंचनपुरस्य दशम्याः कक्षायाः छात्रः राकेशः अस्ति। भवतः पिता अतीवः निर्धनः अस्ति। स्वस्यप्रधानाचार्याय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु। 4

अथवा

भवान् गोविन्दः। स्वकीयं मित्रं राजेन्द्रं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखतु।

| परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान् पुरस्कारम् |
|---|

शैलपुरतः

दिनांकः– 17.12.2020

प्रियमित्रं राजेन्द्र।

नमस्ते।

अत्र अहं कुशलं, भवतः.................................................. कामये। फरवरी मासे पंचमे दिनांके मम विद्यालये.. .......... आयोजनम् अभवत्। अस्मिन् दिवसे .................................... प्रतियोगिताः अभवन्। अहमपि धावनप्रतियागितायां, वादविवादप्रतियोगितायां च भाग................................................. । पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः................................... पुरस्कारवितरणं कृतवान्। अहमपि.................................. ......प्राप्तवान्।

अस्तु...................................सर्वेभ्यः यथायोग्यं नमस्काराः.................................... शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्

गोविन्दः

प्रश्न –22. मंजूषायाः उपयुक्तपदानि गृहीत्वा गुरूशिष्ययोः मध्ये क्रीडायाः विषये संवादं पूरयत। 4

(अध्ययनम् क्रीडने, बहुलाभम्, आवश्यकता, करोषि, अधूना, क्रीडायै क्रीडांगणे)

अध्यापकः – प्रवीण ! त्वम् अत्र किं............................ ?

प्रवीणः – हे गुरो ! अहम्....................... किमपि न करोमि।

अध्यापकः – तर्हि गच्छ। तव मित्राणि तत्र .............................. क्रीडन्ति, तैः सह क्रीड।

प्रवीणः – मम....................... रूचिः नास्ति। अतः अहं न क्रीडामि।

अध्यापकः – स्वस्थशरीरस्य स्वस्थमनसः च कृते क्रीडायाः अस्माकं जीवने महती............. भवति।

प्रवीणः – यदि अहं क्रीडायां ध्यानं दास्यामि तर्हि मम........................ बाधितं भविष्यति।

अध्यापकः – एतद् समीचीनं नास्ति। क्रीडायै स्वल्पसमयम् एव प्रयच्छ अल्पसमयः अपि शरीराय............. प्रदास्यति।

प्रवीणः – बाढम् श्रीमान् ! अतः आरभ्य अहं कंचित् समयं.................... अपि दास्यामि।

अथवा

चित्र दृष्ट्वा मंजुषायां प्रदत्त शब्दानां सहायतया संस्कृतेन षड् वाक्यानि निर्माय लिखत–

प्रश्न –23. अधोलिखितेषु वाक्येषु केषाचनं चतुर्णा व्याक्यानां संस्कृतभाषया अनुवादं करोतु। 4

1. मता पुत्र को उपदेश देती है।
2. गंगा हिमालय से निकलती है।
3. जननी और जन्मभूमि स्वर्ग से भी महान है।
4. कृष्ण के चारों ओर बालक है।
5. विद्या विनम्रता देती है।
6. राधा भोजन पकाती है।